नवसादरं पारदाच्चतुर्थांशमिति सङ्केतः । गड़णं साम्भरिलोण इति भाषा । शेषं स्पष्टम् । इत्यायुर्व्वेदप्रकाशः ॥ ( तथा च ।
"पिष्टं पांशुपटु प्रगाढममलं पञ्चाम्बुना नैकशः
सूतं धातुगतं खटीकवलितं तत्सम्पुटे रोधयेत् ।
अन्तस्तालवणस्य तस्य च तले प्रज्वाल्य वह्निं हठात्
घस्रं ग्राह्य महेन्दुकुन्दधवलं भस्मोपरिस्थं शनैः ॥
तद्वल्लद्वितयं लवङ्गसहितं प्रातः प्रयुक्तं भजेत् ।
ऊर्द्ध्वं रेचयति द्वियाममसकृत् पेयं जलं शीतलम् ॥
एतद्धन्ति च वत्सरावधि विषं षाण्मासिकं मासिकम् ।
शैलोत्थं गरलं खगेन्द्रकुटिलोद्भुतञ्च तात्कालिकम् ॥"
इति सुधानिधिरसः ॥ * ॥ रकर्पूरमिति रसमञ्जरीकारः । श्वेतभस्म इति चन्द्रिका ॥ इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

**रसकेशरं**, क्ली, कर्पूरम् । इति हारावली ॥ ( कर्पूरशब्देऽस्य विवरणं ज्ञातव्यम् ॥ )

**रसगन्धं**, क्ली, वोलम् । इति राजनिर्घण्टः ॥

**रसगन्धः**, पुं, गन्धरसः । यथा,—
"रसगन्धो गन्धरसो गान्धारं मसिवर्द्धनम् ॥"
इति त्रिकाण्डशेषः ॥

**रसगन्धकः**, पुं, (रसगन्ध+स्वार्थे कन् ।) गन्धरसः । इति शब्दचन्द्रिका ॥ गन्धकः । इति राजनिर्घण्टः ॥

**रसगर्भं**, क्ली, रसाञ्जनम् । इत्यमरः ॥ (तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"रसाञ्जनन्तार्क्ष्यशैलं रसगर्भञ्च तार्क्ष्यजम् ॥")
हिङ्गुलम् । इति राजनिर्घण्टः ॥

**रसघ्नः**, पुं, ( रसं रसस्य दोषावहशक्तिं हन्तीति । हन+टक् । ) टङ्कणः । इति राजनिर्घण्टः ॥

**रसजं**, क्ली, ( रसाज्जायते इति । जन्+डः । ) रक्तम् । इति शब्दचन्द्रिका ॥

**रसजः**, पुं, ( रसाज्जातः । जन्+डः । ) गुड़ः । इति राजनिर्घण्टः ॥ ( यथा, मनुः । ११ । १४४ ।
"अन्नाद्यजानां सत्त्वानां रसजानाञ्च सर्व्वशः ॥")
मद्यकीटः । इति हेमचन्द्रः ॥ ( रसजाते, त्रि । यथा,—
"रसजं पुरुषं विद्याद्रसं रक्षेत् प्रयत्नतः ।
अन्नात् पानाच्च मतिमानाचाराच्चाप्यतन्द्रितः ॥"
इति सुश्रुते सूत्रस्थाने चतुर्द्दशेऽध्याये ॥ )

**रसज्ञा**, स्त्री, (रसं जानातीति । ज्ञा+कः । टाप् ।) जिह्वा । इत्यमरः ॥ (गङ्गा । इति काशीखण्डे । २९ । १४६ ।) रसवेत्तरि, त्रि ॥ ( यथा, रघौ । २ । ३६ ।
"यो हेमकुम्भस्तननिःसृतानां
स्कन्दस्य मातुः पयसां रसज्ञः ॥")

**रसज्येष्ठः**, पुं, ( रसेषु ज्येष्ठः । ) मधुररसः । इति हेमचन्द्रः ॥ शृङ्गाररसश्च ॥

**रसतेजः**, [ स् ] क्ली, ( रसात् रसजन्यं वा तेजो यस्य । ) रक्तम् । इति हेमचन्द्रः ॥

**रसदालिका**, स्त्री, ( रसं दालयति इति । दल+णिच्+ण्वुल् । टापि अत इत्वम् ।) पुण्ड्रेक्षुः । इति राजनिर्घण्टः ॥

**रसद्रावी**, [ न् ] पुं, ( रसं द्रावयतीति । द्रु+णिच्+णिनि । ) मधुरजम्बीरः । इति राजनिर्घण्टः ॥

**रसधातुः**, पुं, (रसात्मको धातुः ।) पारदः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायादिर्यथा,—
"रसायनार्थिभिर्लोकैः पारदो रस्यते यतः ।
ततो रस इति प्रोक्तः स च धातुरपि स्मृतः ॥
पारदो रसधातुश्च रसेन्द्रश्च महारसः ।
चपलः शिववीर्य्यञ्च रसः सूतः शिवाह्वयः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

**रसधेनुः**, स्त्री, ( रसकल्पिता धेनुः । ) दानार्थेक्षुरसनिर्म्मितधेनुः । यथा,—
होतोवाच ।
"रसधेनुं महाराज कथयामि समासतः ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशास्तरे ॥
रसस्य तु घटं राजन् संपूर्णमेव वस्य च ।
तद्वत् संकल्पयेत् प्राज्ञश्चतुर्थांशेन वत्सकम् ॥
इक्षुदण्डमयाः पादा रजतक्षुरसंयुताः ।
सुवर्णशृङ्गाभरणां वस्त्रपुच्छां घृतस्तनीम् ॥
पुष्पकम्बलसंयुक्तां शर्करासुखजिह्विकाम् ।
दन्ताः फलमयास्तस्याः पृष्ठताम्रमयीं शुभाम् ॥
पुष्परोमाञ्च राजेन्द्र मुक्ताफलकृतेक्षणाम् ।
सप्तव्रीहिसमायुक्तां चतुर्द्दिक्षु च दीपिकाम् ॥
सर्व्वोपस्करसंयुक्तां सर्व्वगन्धादिवासिताम् ।
चत्वारि तिलपात्राणि चतुर्द्दिक्षु निवेशयेत् ॥
ब्राह्मणे वेदविदुषि श्रोत्रियायाहिताग्नये ।
पुराणज्ञे विशेषेण साधुवृत्ताय धीमते ॥
तादृशाय प्रदातव्या रसधेनुः कुटुम्बिने ।
सर्व्वलक्षणयुक्ताय श्रोत्रियाय कुटुम्बिने ॥
रसधेनुः प्रदातव्या सर्व्वकामेन नित्यदा ।
दाता स्वर्गमवाप्नोति सर्व्वपातकवर्ज्जितः ॥
दाता च ग्राहको वाथ एककालमभोजनः ।
सोमपानफलं तस्य सर्व्वक्रतुफलं लभेत् ॥
दीयमानान्तु पश्यन्ति ते यान्ति परमां गतिम् ।
धेनुञ्च पूजयित्वाथ गन्धधूपस्रगादिभिः ॥
पूर्व्वोक्तैरेव मन्त्रैस्तु ततस्तां प्रार्थयेत् सुधीः ।
प्रार्थनापूर्व्वकं भक्त्या द्विजाग्र्याय निवेदयेत् ॥
दश पूर्व्वान् परांश्चैव आत्मानञ्चैकविंशकम् ।
प्रापयेत् परमं स्थानं स्वर्गान्नावर्त्तते पुनः ॥
एषा ते कथिता राजन् रसधेनुरनुत्तमा ।
देहस्व च महाराज परं स्थानमवाप्नुहि ॥
य इदं पठते नित्यं शृणुयादथ भक्तितः ।
सर्व्वपापविनिर्म्मुक्तो विष्णुलोके महीयते ॥"
इत्यादि वाराहपुराणे श्वेतोपाख्याने रसधेनुमाहात्म्यं समाप्तम् ॥

**रसनं**, क्ली, ( रस्+भावे ल्युट् । ) स्वादनम् । ध्वनिः । इति मेदिनी ॥ (यथा, बृहत्संहितायाम् । ४६ । ८८ ।
"कम्पोद्गमनवैकृत्यं रसनं दरणं चितेः ॥")

**रसनं**, क्ली स्त्री, ( रस्यते रसयत्यनेन वा । रस+करणे ल्युट् । ) जिह्वा । इति मेदिनी ॥ सा च जलेन्द्रियम् । यथा,—
"नित्यतादि प्रथमवत् किन्तु देहमयोनिजम् ।
इन्द्रियं रसनं सिन्धुर्हिमादिर्व्विषयो मतः ॥"
इति भाषापरिच्छेदः ॥
"प्रथमवदिति पृथिव्या इवेत्यर्थः । तथा हि जलं द्विविधं नित्यमनित्यञ्च । परमाणुरूपं नित्यं द्व्यणुकादिकं सर्व्वमनित्यम् । अवयवसमवेतञ्चानित्यजलमपि त्रिविधम् । शरीरेन्द्रियविषयभेदात् । किन्तु पृथिवीतोययोर्विशेषस्तमाह किन्त्विति । अयोनिजमेवेत्यर्थः । जलीयं शरीरं अयोनिजं वरुणलोके प्रसिद्धमिति । इन्द्रियं रसनं जलीयम् । तथा हि रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् । सक्तुरसाभिव्यञ्जकोदकवत् । रसनासन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं हेतौ देयम् । विषयं दर्शयति सिन्धुर्हिमादिरिति । सिन्धुः समुद्रः हिमं तुषारः । आदिना सरित्कासारकरकादिः सर्व्वो ग्राह्यः ।" इति सिद्धान्तमुक्तावली ॥

**रसना**, स्त्री, ( रस+युच् । टाप् च । ) जिह्वा । इत्यमरः ॥ (यथा, भागवते । ९ । ४ । १९ ।
"घ्राणञ्च तत्पादसरोजसौरभे
श्रीमत्तुलस्या रसनां तदर्पिते ॥")
तस्याः शुभलक्षणं यथा,—
"तीक्ष्णा दंष्ट्राः समाः श्रेष्ठा जिह्वा रक्ता समा शुभा ।
श्लक्ष्णा दीर्घा च विज्ञेया तालुः श्वेतो धनक्षये ॥"
इति गारुड़े ६६ अध्यायः ॥
न्यायमते रसनेन्द्रियग्राह्यो रसो रसत्वादिसहितः । यथा,—
"रसस्तु रसनाग्राह्यो मधुरादिरनेकधा ।
सहकारी रसज्ञाया नित्यतादि च पूर्व्ववत् ॥
घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः ।
तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः ॥"
इति भाषापरिच्छेदः ॥
"तथा रस इति रसत्वादिसहित इत्यर्थः ।" इति सिद्धान्तमुक्तावली ॥ * ॥ रास्ना । इति मेदिनी ॥ (अस्याः पर्य्यायो यथा,—
"रास्ना युक्तरसा रस्या सुवहा रसना रसा ।
एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गन्धभद्रा । इति शब्दचन्द्रिका ॥ काञ्ची । इति हेमचन्द्रः ॥ (यथा, रघौ । ७ । १० ।
"कस्याश्चिदासीद्रसना तदानीं
अङ्गुष्ठमूलार्पितसूत्रशेषा ॥")
रज्जुः । इति संक्षिप्तसारोणादिवृत्तिः ॥

**रसनाथः**, पुं, ( रसानां नाथः श्रेष्ठ इत्यर्थः । ) पारदः । इति राजनिर्घण्टः ॥

**रसनायकः**, पुं, ( रसानां नायकः नेता रसायनविद्याविष्कारकत्वादस्य तथात्वम् । ) शिवः । इति शब्दरत्नावली ॥